A.C. Joshi Library
P.U. Chandigarh

MSS No. 371 Subject Religion

Name of MSS श्रीमद् भागवत महात्मय

Author

Period Folios 11

Script Devnagiri Source Pirthi Pal Singh

Missing Folios

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

A - no - 371

371

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ स्वस्ति श्रीगणेशाय नमः ॐ यं प्रव्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव पुत्रेति तन्मयतयातरवोभिनेदुस्तं सर्वभूतहृदयं मुनिमा
नतोस्मि १ नैमिषे सूतमासीनमभिवाद्य महामतिं कथामृतरसास्वादकुशलः शौनकोब्रवीत् २ शौनक उवाच अज्ञानध्वांतविध्वंसकोटिसूर्यसमप्र
भ सूताख्याहि कथासारं मम कर्णरसायनं ३ भक्तिज्ञानविरागाप्त्यो विवेको वर्द्धते कथं मायामोहनिरासश्च वैष्णवैः क्रियते कथं ४ इह घोरे कलौ प्रायो
जीवश्चासुरतां गतः क्लेशाक्रांतस्य तस्यैव शोधने किं परायणं ५ श्रेयसां यद्भवेच्छ्रेयः पावनानां च पावनं कृष्णप्राप्तिकरं शश्वत्साधनं तद्वदाधु
ना ६ चिंतामणिर्लोकसुखं सुरद्रुः स्वर्गसंपदं प्रयच्छति गुरुः प्रीतो मोक्षं तु योगिदुर्लभं ७ सूत उवाच प्रीतिः शौनक चित्ते ते ततो वच्मि विचा
र्य च सर्वसिद्धांतनिष्पन्नं संसारभयनाशनं ८ भक्त्योघवर्द्धनं यच्च कृष्णसंतोषहेतुकं तदहं तेभिधास्यामि सावधानतया शृणु ९ का
लव्यालमुखग्रासत्रासनिर्णाशहेतवे श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितं १० एतस्मादपरं किंचिन्मनः शुद्ध्यै न विद्यते जन्मांतरे भवे
त्पुण्यं तदा भागवतं लभेत् ११ परीक्षिते कथां वक्तुं सभायां संस्थिते शुके सुधाकुंभं गृहीत्वैव देवास्तत्र समागमन् १२ शुकं नत्वावदन्सर्वे स्वका
र्यकुशलाः सुराः कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमां १३ एवं विनिमये जाते सुधा राज्ञा प्रपीयतां प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतं १४
क्व सुधा क्व कथा लोके क्व काचः क्व मणिर्महान् ब्रह्मरातो विचार्येति तदा देवान् जहास ह १५ अभक्तांस्तांश्च विज्ञाय न ददौ स कथामृतं श्रीमद्भा
गवती वार्त्ता सुराणामपि दुर्लभा १६ राज्ञो मोक्षं तथा वीक्ष्य पुरा धातापि विस्मितः सत्यलोके तुलां बध्वा तोलयत्साधनान्यजः १७ लघून्यन्या
नि जातानि गौरवेण इदं महत् तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः १८ मेनिरे भगवद्रूपं शास्त्रं भागवतं क्षितौ पठनाच्छ्रवणात्सद्यो मोक्षं स
फलं प्रयात् १९ सप्ताहेन श्रुतं चैतत्सर्वथा मुक्तिदायकं सनकाद्यैः पुरा प्रोक्तं नारदाय दयापरैः २० यद्यपि ब्रह्मसंबंधाच्छ्रुतमेतत्सुरर्षिणा
सप्ताहश्रवणविधिः कुमारैस्तस्य भाषितः २१ शौनक उवाच लोकविग्रहमुक्तस्य नारदस्यास्थिरस्य च विधिश्रवणे कुतः प्रीतिः संयोगः क्व कुमारैः सह २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा० म० २

नामानौ कालयोगेन जर्जरौ ४४ गंगाद्याः सरितश्चेमा मत्सेवार्थं समागताः तथापि न च मे श्रेयः सेवितायाः सुरैरपि ४५ इदानीं शृणु मे वार्तां स
चित्तस्त्वं तपोधन वार्ता मे विदिता प्यस्ति तां श्रुत्वा सुखमावह ४६ उत्पन्ना द्राविडे साहं वृद्धिं कार्णाटके गता क्वचित्क्वचिन्महाराष्ट्रे गुर्ज
रीजीर्णतां गता ४७ तत्र घोरकलेर्योगात्पाखंडैः खंडितांगका दुर्बलाहं चिरं याता पुत्राभ्यां सह मंदतां ४८ वृंदावनं पुनः प्राप्य न
वीनेव सुरूपिणी जाताहं युवती सम्यक् प्रेष्ठरूपा तु सांप्रतं ४९ इमौ तु शयितावत्र सुतौ मे क्लिश्यतः श्रमात् इदं स्थानं परित्यज्य
विदेशं गम्यते मया ५० जरठत्वं समायातौ तेन दुःखेन दुःखिता साहं तु तरुणी कस्मात्सुतौ वृद्धाविमौ कुतः ५१ त्रयाणां सहचा
रित्वाद्वैपरीत्यं कुतः स्थितं घटते जरठा माता तरुणौ तनयाविति ५२ अतः शोचामि चात्मानं विस्मयाविष्टमानसा वद योगनिधे धी
मन्कारणं चात्र किं भवेत् ५३ नारद उवाच ज्ञानेनात्मनि पश्यामि सर्वमेतत्तवानघे न विषादस्त्वया कार्यो हरिः शं ते करिष्यति ५४ सूत
उवाच क्षणमात्रेण तज्ज्ञात्वा वाक्यमूचे मुनीश्वरः शृणुष्वावहिता बाले युगोयं दारुणः कलिः ५५ तेन लुप्तः सदाचार योगमार्गा
तपांसि च जना पापकृताः सर्वे शाठ्यदुष्कर्मकारिणः ५६ इह संतो विषीदंति प्रहृष्यंति ह्यसाधवः धत्ते धैर्यं तु यो धीमान्स धीरः पंडि
तोथवा अस्पृश्यानवलोक्येयं शेषभारकरा धरा वर्षे वर्षे क्रमाज्जाता मंगलं नापि दृश्यते ५८ न त्वामपि सुतैः साकं कोपि पश्यति सांप्रतं
उपेक्षितानुरागांधैर्जर्जरत्वेन संस्थिता वृंदावनस्य संयोगात्पुनस्त्वं तरुणी नवा धन्यं वृंदावनं तेन भक्तिर्नृत्यति यत्र च ६० अत्रेमौ ग्राह
कामावान्न जरामपि मुंचतः किंचिदात्मसुखेनेह प्रसुप्तिर्मन्यतेनयोः ६१ भक्तिरुवाच कथं परीक्षिता राज्ञा स्थापितो ह्यशुचिः कलिः प्रवृ
त्ते तु कलौ सर्वसारः कुत्र गतो महान् ६२ दयापरेण हरिणा पापधर्मः कथमीप्सते इमं मे संशयं छिंधि त्वद्वाचा सुखितास्म्यहं ६३ नारद उ
वाच यदि पृष्टस्त्वया बाले प्रेमतः श्रवणं कुरु सर्वं वक्ष्यामि ते भद्रे कश्मलं ते गमिष्यति ६४ यदा मुकुंदो भगवान् क्ष्मां त्यक्त्वा स्वपदं गतः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

1A

सूत उवाच अथ ते कीर्तयिष्यामि भक्तिपुत्रकथानकं श्रुकेन मम यत्प्रोक्तं रहः शिष्यं विचार्य च २३ एकदा हि विशालायां चत्वारो ऋषयोऽमलाः
सत्संगार्थं समायाताः ददृशुस्तत्र नारदं २४ कुमारा ऊचुः कथं ब्रह्मन्दीनमुखः कुतश्चिंतातुरोधुना इदानीं शून्यचित्तोसि गतवित्तो यथा
जनः २५ तवेदं मुक्तसंगस्य नोचितं वद कारणं त्वरितं गम्यते कुत्र कुतश्चागमनं तव एतन्मे ब्रूहि देवर्षे सत्यं सत्यं मुनिश्चितं २६ नारद उवा
च अहं तु पृथिवीं यातो ज्ञात्वा सर्वोत्तमामिति पुष्करं च प्रयागं च काशीं गोदावरीं तथा २७ हरिक्षेत्रं कुरुक्षेत्रं श्रीरंगं सेतुबंधनं एवमादिषु तीर्थे
षु भ्रममाणा इतस्ततः २८ नापश्यं कुत्रचिच्छर्म मनःसंतोषहेतुकं कलिनाधर्ममित्रेण धरेयं बाधिताधुना २९ सत्यं नास्ति तपः शौचं दया
दानं न विद्यते उदरंभरिणो जीवा वराकाः कूटभाषिणः ३० मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः पाखंडनिरताः संतो विरक्ताः सपरि
ग्रहाः ३१ तरुणीप्रभुता गेहे श्यालको बुद्धिदायकः कन्याविक्रयिणो लोभाद्दंपतीनां च कल्कनं आश्रमा यवनै रुद्धा तीर्थानि सरितस्तथा
देवतायतनान्यत्र दुष्टैर्नष्टानि भूरिशः ३३ न योगी नैव सिद्धो वा न ज्ञानी सत्क्रियो नरः कलिदावानलेनाद्य साधनं भस्मतां गतं ३४ अट्टशूला
जनपदाः शिवशूला द्विजातयः कामिन्यः केशशूलिन्यः संभवंति कलाविह ३५ एवं पश्यन्कलेर्दोषान्पर्यटन्नवनीमहं यामुनं तटमापन्नो यत्र
लीला हरेरभूत ३६ तत्राश्चर्यं मया दृष्टं श्रूयतां तन्मुनीश्वराः एका तु तरुणी तत्र विशाला खिन्नमानसा ३७ वृद्धौ द्वौ पतितौ पार्श्वे निःश्वसं
तावचेतनौ शुश्रूषंती प्रबोधंती रुदती च तयोः पुरः ३८ दशदिक्षु निरीक्षंती रक्षितारं निजं पुनः वीज्यमाना शतस्त्रीभिर्बोध्यमाना पुनः पुनः ३९
दृष्ट्वा दूराद्गतः सोहं कौतुकेन तदंतिकं मां दृष्ट्वा चोत्थिता बाला विह्वला चाब्रवीद्वचः ४० बालोवाच भो भोः साधो क्षणं तिष्ठ मच्चिंतामपि नाशय दर्श
नं तव लोकस्य सर्वथाघहरं परं ४१ बहुधा तव वाक्येन दुःखशांतिर्भविष्यति यदा भाग्यं भवेद्भूरि भवतो दर्शनं तदा ४२ नारद उवाच कासि त्वं का
विमौ चेमा नार्यः काः पद्मलोचना वद देवि सविस्तारं स्वस्य दुःखस्य कारणं ४३ बालोवाच अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ ज्ञानविज्ञाना

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तद्दिनात्कलिरायातः सर्वसाधनबाधकः ६५ दृष्टो दिग्विजये राजा दीनवच्छरणं गतः नमया मारणीयोयं सारंग इव सारभुक् ६६ य
त्फलं नास्ति तपसा न योगेन समाधिना तत्फलं लभते सम्यक् कलौ केशवकीर्तनात् ६७ यवाकारं कलिं दृष्ट्वा सारवत्सारनीरसं विष्णु
रातः स्थापितवान् कलिजानां सुखाय च ६८ कुकर्माचरणात्सारः सर्वतो निर्गतोधुना पदार्थाः संस्थिता भूमौ बीजहीना यथा तुषाः
६९ विप्रैर्भागवती वार्ता गेहे गेहे जने जने कारिता कणलोभेन कथासारस्ततो गतः ७० मनसश्चाजयाल्लोभाद्दंभात्पाखंडसंश्रयात् शास्त्रा
नभ्यसनाच्चैव ध्यानयोगफलं गतः ७१ कामक्रोधमहालोभतृष्णाव्याकुलचेतसः तेपि तिष्ठंति तपसि तपःसारस्ततो गतः ७२ अत्युग्रभूरि
कर्माणो नास्तिका दांभिकाः जनाः तेपि तिष्ठंति तीर्थेषु तीर्थसारस्ततो गतः ७३ पंडितास्तु कलत्रेण रमंते महिषा इव पुत्रोत्पादनदक्षा
लेप्यदक्षा मुक्तिसाधने ७४ नहि वैष्णवता कुत्र संप्रदायपुरःसरा एवं प्रलयतां प्राप्तो वस्तुसारः स्थले स्थले अयं तु युगधर्मो हि वर्तते कस्य
दूषणं अतस्तु पुंडरीकाक्षः सहते निकटे स्थितः ७६ सूत उवाच इति तद्वचनं श्रुत्वा विस्मयं परमं गता भक्तिरूचे वचो भूयः श्रूयतां तच्च शो
भनं १ सुरर्षे त्वं च धन्योसि मद्भाग्येन समागतः साधूनां दर्शनं लोके सर्वसिद्धिकरं परं ७८ ज्ञानदो यस्य मे स्यात्तु याया यत्वयो ध्वनो योगे
णस्थापितेव त्वन्न साध्वेव वर्ततेधुना ७९ जयति जगति मायां यस्य कायाधवस्ते वचनरचनमेकं केवलं चाकलय्य ध्रुवपदमपि या
तो यत्कृपातो ध्रुवोयं सकलकुशलपात्रं ब्रह्मपुत्रं नतोस्मि ८० इति श्रीपद्मपुराणे उत्तरखंडे श्रीभागवतपारायणमाहात्म्ये भक्तिना
रदसमागमो नाम प्रथमोध्यायः १ नारद उवाच वृथा खेदयसे बाले अहो चिंतातुरा कथं श्रीकृष्णचरणांभोजं स्मर दुःखं गमिष्यति १
द्रौपदी च परित्राता येन कौरवकश्मलात् पालिता गोपसुंदर्यः स कृष्णः क्वापि नो गतः २ त्वं तु भक्तिः प्रिया तस्य सततं प्राणतोधिका
त्वयाहूतोपि भगवान् याति नीचगृहेष्वपि ३ सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी ४ इति नि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३ त्रित्यचिद्रूपः स्वरूपां त्वां ससर्ज हरि परमानंदचिन्मूर्त्तिः सुंदरीं कृष्णवल्लभां ५ बद्धांजलिस्त्वया पृष्टः किं करोमीति चैकदा त्वां तदाज्ञापय
3 त्कृष्णो मद्भक्तान्पोषयेति वै अंगीकृतं त्वया तद्वै प्रसन्नोभूद्धरिस्तदा मुक्तिं दासीं ददौ तुभ्यं ज्ञानविज्ञानकाविमौ पोषणं स्वेन रूपेण स्वधाम्नि
प्रकरोषि वै भूमौ भक्तविभूषार्थं छायारूपं त्वया कृतं ८ मुक्तिं ज्ञानं विरक्तिं च सह कृत्वा गता भुवि कृतादिद्वापरस्यांतं महानंदेन संस्थि न२
ता ९ कलौ मुक्तिः क्षयं प्राप्ता पाखंडामयपीडिता त्वदाज्ञया गता शीघ्रं स्वधाम पुनरेव सा १० स्मृता त्वयापि चात्रैव मुक्तिरायाति या
ति च पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्यैव रक्षितौ ११ उपेक्षातः कलौ मंदौ वृद्धौ जातौ सुतौ तव तथापि चिंतां मुंच त्वमुपायं चिंतये त्वहं
१२ कलिना सदृशः कोपि युगो नास्ति वरानने तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने १३ अन्यधर्मान् तिरस्कृत्य पुरस्कृत्य म
होत्सवान् तदा नाहं हरेर्दासो लोके त्वां न प्रवर्त्तये १४ त्वदन्विताश्च ये जीवा भविष्यंति कलाविह पापिनोपि गमिष्यंति निर्भयाः कृ
ष्णमंदिरं १५ येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी न ते पश्यंति कीनाशं स्वप्नेप्यमलमूर्त्तयः १६ न प्रेतो न पिशाचो वा राक्षसो वासुरोपि
वा भक्तियुक्तमनस्कानां स्पर्शनेपि प्रभुर्भवेत् १७ न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः नृणां
जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः १९ भक्तिद्रोहकरा ये च ते सीदंति जगत्त्रये दुर्वासा
दुःखमापन्नो पुरा भक्तविनिंदकः २० अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा २१ इति नारदनिर्णी
तं स्वमाहात्म्यं निशम्य सा सर्वांगपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् २२ भक्तिरुवाच अहो नारद धन्योसि प्रीतिस्ते मयि निश्चला न कदावि
द्विमुंचामि चित्ते स्थास्यामि सर्वदा २३ कृपालुना त्वया साधो मद्बाधा ध्वंसिता क्षणात् पुत्रयोश्चेतनं नास्ति ततो बोधय बोधय २४ सूत उवाच
तस्या वचः समाकर्ण्य कारुण्यं नारदो गतः तयोर्बोधनमारेभे कराग्रेण विमर्दयन् मुखं संयोज्य कर्णांते शब्दमुच्चैः समुच्चरन् ज्ञानप्रबु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ध्यानौ शीघ्रं हे वै राग्य विबुध्यतां वेदवेदांतघोषैश्च गीतापाठैर्मुहुर्मुहुः बोध्यमानौ तदा तेन कथंचिद्बोधितौ बलात् नेत्रैरनवलोकंतौ सा
स सावुभौ वकवत्यलितौ प्रायः सुष्ककाष्ठसमांगकौ २८ दृष्ट्वा मौनौ निरीक्ष्यैव पुनः स्वापपरायणौ ऋषिश्चिंतातुरो जातः किं विधेयं म
येति च २९ अहो निद्रा कथं याति वृद्धत्वं च महत्तरं चिंतयन्निति गोविंदं स्मारयामास भार्गव ३० व्योमवाणि तदैवाभूत् मा ऋषे खिद्यतामिति
उद्यमः सफलस्तेन भविष्यति न संशयः ३१ ततस्तेषि नु तत्कर्म सुर्षे तत्समाचर तत्रैकमभिधास्यंति साधवा साधुभूषणाः ३२ सत्कर्मणीरित
ते तस्मिन्मानिद्रा वृद्धतानयोः गमिष्यति ताणाद्भक्तिः सर्वतः प्रसरिष्यति ३३ इत्याकाशवचः स्पष्टं तत्सर्वैरपि विश्रुतं नारदो विस्मयं लेभेने
दं ज्ञानमिति ब्रुवन् ३४ नारद उवाच अनयाकाशवाण्यापि गोप्यत्वेन निरूपितं किं वा तत्साधनं कार्यं येन कार्यं भवेत्तयोः ३५ क्व भविष्य वे
ति ते सतः कथं स्यास्यंति साधने मयात्र किं प्रकर्तव्यं यदुक्तं व्योमभाषया ३६ सूत उवाच तत्र तावथ संस्थाप्य निर्गतो नारदो मुनिः तीर्थं तीर्थं
विनिष्क्रम्य पृच्छन्मार्गे ऋषीश्वरान् ३७ वृत्तांतः श्रूयते सर्वैः किंचिन्निश्चित्य नोच्यते असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे ३८ मूकीभूता
स्तथा चान्ये कियंतस्तु पलायिताः हाहाकारो महानासीत्त्रिलोके विस्मयावहः वेदवेदांतघोषैश्च गीतापाठैर्विबोधितं भक्तिज्ञानविरागाणां नोद
तिष्ठत्त्रिकं यदा ४० उपायो नापरोस्तीति कर्णे कर्णे जपन्जनाः योगिना नारदेनापि स्वयं न ज्ञायते तु यत् ४१ तत्कथं शक्यते वक्तुमितरैरिह मानुषैः
एवं ऋषिगणैः पृष्टैर्निर्णीयोक्तं दुरासदं ततश्चिंतातुरः सोथ बदरीवनमागतः तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः तावद्ददर्श पुरतः सन
कादीन्मुनीश्वरान् कोटिसूर्यसमाभासान् उवाच मुनिसत्तमः ४४ नारद उवाच इदानीं भूरिभाग्येन भवद्भिः संगमोस्ति मे कुमारा वदतां शीघ्रं
कृपां कृत्वा ममोपरि भवंतो योगिनः सर्वे बुद्धिमंतो बहुश्रुताः पंचहायनसंयुक्ताः पूर्वेषामपि पूर्वजाः ४६ सदा स्वधामनिलये हरिकीर्तन
तत्पराः लीलामृतरसोन्मत्ताः कथामात्रैकजीविनः ४७ हरिः शरणमेवं हि नित्यं येषां मुखे वचः अतः कालसमादिष्टा जरा युष्मान्न बाधते
४८ येषां भ्रूभंगमात्रेण द्वारपालौ हरेः पुरा भूमौ निपतितौ सद्यो यत्कृपातः परं गतौ ४९ अहो भाग्यस्य योगेन दर्शनं भवतामिह अन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३

श्चित्य चिद्रूपः स्वरूपां त्वां ससर्ज ह परमानंदचिन्मूर्त्तिः सुंदरीं कृष्णवल्लभां ५ बध्वांजलीत्वयापृष्टः किं करोमीति चैकदा त्वां तदाज्ञापय
त्कृष्णो मद्भक्तान्पोषयेति च अंगीकृतं त्वया तद्वै प्रसन्नोभूद्धरिस्तदा मुक्तिं दासीं ददौ तुभ्यं ज्ञानविज्ञानकाविमौ पोषणं स्वेन रूपेण स्वधाम्नि नर
प्रकरोषि च भूमौ भक्तविपोषाय छायारूपं त्वया कृतं ८ मुक्तिं ज्ञानं विरक्तिं च सह कृत्वा गता भुवि कृतादिद्वापरस्यांतं महानंदेन संस्थि
ता ९ कलौ मुक्तिः क्षयं प्राप्ता पाषंडामयपीडिता त्वदाज्ञया गता शीघ्रं स्वधाम पुनरेव सा १० स्मृता त्वयापि चात्रैव मुक्तिरायाति या
ति च पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्य च रक्षितौ ११ उपेक्षातः कलौ मंदौ वृद्धौ जातौ सुतौ तव तथापि चिंतां मुंच त्वमुपायं चिंतये ह्यहं
१२ कलिना सदृशः कोपि युगो नास्ति वरानने तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने १३ अन्यधर्मान् तिरस्कृत्य पुरस्कृत्य म
होत्सवान् तदा नाहं हरेर्दासो लोके त्वां न प्रवर्त्तये १४ त्वदन्विताश्च ये जीवा भविष्यंति कलाविह पापिनोपि गमिष्यंति निर्भयाः कृ
ष्णमंदिरं १५ येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी न ते पश्यंति कीनाशं स्वप्नेप्यमलमूर्त्तयः १६ न प्रेतो न पिशाचो वा राक्षसो वासुरोपि
वा भक्तियुक्तमनस्कानां स्पर्शेपि प्रभुर्भवेत् १७ न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः नृणां
जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः १९ भक्तिद्रोहकरा ये च ते सीदंति जगत्त्रये दुर्वासा
दुःखमापन्नो पुरा भक्तविनिंदकः २० अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा २१ इति नारदनिर्णी
तं स्वमाहात्म्यं निशम्य सा सर्वांगपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् २२ भक्तिरुवाच अहो नारद धन्योसि प्रीतिस्ते मयि निश्चला न कदावि
द्विमुंचामि चित्ते स्थास्यामि सर्वदा २३ कृपालुना त्वया साधो मद्बाधा ध्वंसिता क्षणात् पुत्रयोश्चेतनं नास्ति ततो बोधय बोधय २४ सूत उवाच
तस्या वचः समाकर्ण्य कारुण्यं नारदो गतः तयोर्बोधनमारेभे कराग्रेण विमर्दयन् मुखं संयोज्य कर्णांते शब्दमुच्चैः समुच्चरन् ज्ञान प्रबु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३

3A

जे भतो।

ध्यानो शीघ्रं हे नैराग्य विबुध्यतां वेदवेदांतघोषैश्च गीतापाठैर्मुहुर्मुहुः बोध्यमानौ तदा तेन कथंचिच्चोशितौ बलात् नेत्रैरनवलोकं तौ मा
स मातुभौ वक्रवत्पलितौ प्रायः सघ्नकाष्ठसमांगकौ २८ दृत्वा मौनौ निरीक्ष्यैव पुनः स्वापपरायणौ ऋषिश्चिंतातुरो जातः किं विधेयं म
येति च २९ अहो निद्रा कथं याति वृद्धत्वं च महत्तरं चिंतयन्नति गोविंदस्मारयामास भार्गव ३० व्योमवाणी तदैवाभूत् मा ऋषे खिद्यतामिति
उद्यमः सफलो नित्य भविष्यति न संशयः ३१ एतदर्थं तु सत्कर्म सर्वार्थं त्वं समाचर तत्कर्माभिधास्यंति साधवः साधुभूषणाः ३२ सत्कर्मणि कृ
ते तस्मिन् मानिद्रा वृद्धतानयोः गमिष्यति तयोर्दृष्टिः सर्वतः प्रसरिष्यति ३३ इत्याकाशवचः स्पष्टं तत्सर्वैरपि विश्रुतं नारदो विस्मयं लेभे ने
दं ज्ञातमिति ब्रुवन् ३४ नारद उवाच अनया काशवाण्यापि गोप्यत्वेन निरूपितं किं वा तत्साधनं कार्यं येन कार्यं भवेत्तयोः ३५ धम विष्णु वे
तिते सतः कथं दास्यंति साधनं मयात्र किं प्रकर्तव्यं यदुक्तं व्योमभाषया ३६ सूत उवाच ततस्तावथ संस्थाप्य निर्गतो नारदो मुनिः तीर्थं तीर्थं
विनिष्क्रम्य पृष्ट्वा मार्गे ऋषीश्वरान् ३७ वृत्तांतः श्रूयते सर्वैः किंचिन्निश्चित्य नोच्यते असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे ३८ मूकीभूता
स्तथा वान्ये कियंतस्तु पलायिताः हाहाकारो महानासीत्त्रिलोके विस्मयावहः वेदवेदांतघोषैश्च गीतापाठैर्विबोधितौ भक्तिज्ञानविरागाणां नोद
तिष्ठत्त्रिकं यदा ४० उपायो नापरोस्तीति कर्णे कर्णेजपञ्जनाः योगिना नारदेनापि स्वयं न ज्ञायते तु यत् ४१ तत्कथं शक्यते वक्तुमितरैरिह मानुषैः
एवं ऋषिगणैः पृष्टैर्निर्णीयोक्तं दुरासदं ततश्चिंतातुरो सोऽथ बदरीवनमागतः तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः तावद्ददर्श पुरतः सन
कादीन्मुनीश्वरान् कोटिसूर्यसमाभासान् उवाच मुनिसत्तमः ४४ नारद उवाच इदानीं भूरिभाग्येन भवद्भिः संगमास्थितः कुमारा वदतां शीघ्रं
कृपां कृत्वा ममोपरि भवंतो योगिनः सर्वे बुद्धिमंतो बहुश्रुताः पंचहायनसंयुक्ताः पूर्वेषामपि पूर्वजाः ४६ सदा स्वधामनिलया हरिकीर्तन
तत्पराः लीलामृतरसोन्मत्ताः कथामात्रैकजीविनः ४७ हरिः शरणमेवं हि नित्यं येषां मुखे वचः अंतकालसमादिष्टा जरा युष्मान्न बाधते
४८ येषां भ्रूभंगमात्रेण द्वारपालौ हरेः पुरा भूमौ निपतितौ सद्यो यत्कृपातः परं गतौ ४९ अहो भाग्यस्य योगेन दर्शनं भवतामिह अनु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गतस्तु कर्तव्यो मयि दीने दयापरैः ५० अपारीरगिरा तेनं यत्तत्किं साधनमुच्यतां अनुष्टेयं कथं तावत्प्रब्रुवंतु सुविस्तरं भक्तिज्ञानविरागाणां सु
खमुत्पद्यते कथं स्थापनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः ५२ सनत्कुमार उवाच मा चिंतां कुरु देवर्षे हर्षं चित्ते समावह उपायः सुखसाध्यो
ऽत्र वर्तते पूर्वगावहि ५३ अहो नारद धन्योसि विरक्तानां शिरोमणे सदा श्रीकृष्णदासानामग्रणीर्योगभास्करः ५४ त्वयि चित्रं न मंतव्यं भ
क्त्यर्थमनुवर्त्तिनि घटते कृष्णदासस्य भक्तेः स्थापनता सदा ५५ ऋषिभिर्वहवो लोके पंथानः प्रगटीकृताः श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफ
लायताः ५६ वैकुंठसाधकः पंथा स तु गोप्यो हि वर्तते तस्योपदेष्टा पुरुषः प्रायो भाग्येन लभ्यते ५७ सत्कर्म तव निर्दिष्टं व्योमवाचा तु यत्पुरा तदु
च्यते श्रुणुष्वाद्य स्थिरचित्तः प्रसन्नधीः द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे स्वाध्यायज्ञानयज्ञाश्च ते तु कर्मविसूचकाः सत्कर्मसूचको नू
नं ज्ञानयज्ञः स्मृतो बुधैः श्रीमद्भागवतालापः स गीतो शुकादिभिः भक्तिज्ञानविरागाणां तद्घोषेण बलं महत् व्रजिष्यति द्वयोः कष्टं सुखं भ
क्तेर्भविष्यति प्रलयं हि गमिष्यंति श्रीमद्भागवतध्वनेः कलिदोषा इमे सर्वे सिंहशब्दाद्वृका इव ज्ञानवैराग्यसंयुक्ता भक्तिः प्रेमरसावहा
प्रतिगेहं प्रतिजनं ततः क्रीडां करिष्यति ६३ नारद उवाच वेदवेदांतघोषैश्च गीतापाठैः प्रबोधितं भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं तु तत
६४ श्रीमद्भागवतालापात्तत्कथं बोधमेष्यति तत्कथासु च वेदार्थः श्लोके श्लोके पदे पदे ६५ छिंदंतु संशयं ह्येनं भवंतो मोघदर्शनाः
विलंबो नात्र कर्तव्यः शरणागतवत्सलाः ६६ कुमारा ऊचुः वेदोपनिषदां साराज्जाता भागवती कथा अत्युत्तमा ततो भाति पृथग्भू
ता फलाकृतिः ६७ आमूलाग्रं रसस्तिष्ठन्नास्ते न स्वाद्यते यथा संभूय स पृथग्भूतः फले विश्वमनोहरः ६८ यथा दुग्धे स्थितं सर्पिर्न स्वा
दायोपकल्पते पृथग्भूतं हि तद्दिव्यं देवानां रसवर्द्धनं ६९ इक्षूणामादिमध्यांते शर्करा व्याप्य तिष्ठति पृथग्भूता च सा मिष्टा तथा
भागवती कथा ७० इदं भागवतं नाम पुराणं ब्रह्मसम्मितं भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितं वेदांतवेदसुस्नाते गीताया अपि क.

तेपि पवित्रतां यन्ति व्यासे मग्नस्य ज्ञानसागरे तदा त्वया पुरा प्रोक्तं वचः श्लोकसमन्वितं तदीयश्रवणात्सद्यो निर्वाधो बादरायणः तत्र ते विस्मयः
केनयतः प्रश्नकर्त्ता भवान् श्रीमद्भागवतस्यार्थः शोकदुःखविनाशनं ७४ नारद उवाच यद्दर्शनं च विनिहंत्यशुभानि सद्यः श्रेयस्तनोति भवदुःख
दवार्दितानां निःशेषशोषमुखशान्तिकृदेकपानाः प्रेमप्रकाशकृतये शरणं गतोस्मि ७५ भाग्योदयेन बहुजन्मसमार्जितेन सत्संगमं च लभते पुरु
षो यदा वै अज्ञानहेतुकृतमोहमदांधकारनाशं विधाय हि तदोदयते विवेकः ७६ इति श्रीपद्मपुराणे श्रीभागवतपारायणमाहात्म्ये निरू
पणे कुमारनारदसमागमो नाम द्वितीयोध्यायः २ नारद उवाच ज्ञानयज्ञं करिष्यामि शुकशास्त्रकथोज्वलं भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्न
तः १ कुत्र कार्य्यो मया यज्ञः स्थलं तद्वाच्यतामिह महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः २ कियद्भिर्दिवसैः श्राव्या श्रीमद्भागवती कथा को विधि
स्तत्र कर्तव्यो ममेदं वदतामिति ३ कुमारा ऊचुः शृणु नारद वक्ष्यामो विनम्राय विवेकिने गंगाद्वारसमीपे तु तटमानंदनामकं ४ नानाऋषिगणैर्जुष्टं
देवसिद्धनिषेवितं नानातरुलताकीर्णं नवकोमलवालुकं ५ रम्यमेकांतदेशस्थं हेमपद्मसुसौरभं यत्समीपस्थजीवानां वैरं चेतसि नास्ति तं ६ ज्ञानय
ज्ञस्त्वया तत्र कर्तव्यो ह्यप्रयत्नतः अपूर्वरसरूपा च कथा तत्र भविष्यति ७ पुरःस्थं निर्वलं चैव जराजीर्णकलेवरं तद्द्वयं च पुरस्कृ
त्य भक्तिस्तत्रागमिष्यति ८ यत्र भागवती वार्ता तत्र भक्त्यादिकं व्रजेत् कथाशब्दं समाकर्ण्य त्रिकं तत्तरुणायते ९ सूत उवाच एवमुक्त्वा कु
मारास्ते नारदेन समं ततः गंगातटं समाजग्मुः कथापानाय सत्वराः १० यदा याता तटं ते तु तदा कोलाहलो ह्यभूत् भूर्लोके देवलोके च ब्रह्मलोके
तथैव च ११ श्रीभागवतपीयूषपानाय रसलंपटाः धावंतोप्याययुः सर्वे प्रथमं ये च वैष्णवाः १२ भृगुर्वसिष्ठश्च्यवनश्च गौतमो मेधातिथिर्देवल
देवरातौ रामस्तथा गाधिसुतश्च शाकलः मृकंडुपुत्रात्रिजपिप्पलादाः १३ योगेश्वरौ व्यासपराशरौ च छायाशुको जाजलि जह्नुमुख्याः सर्वेप्यमी मुनि
गणाः सपुत्रशिष्याः स्वस्त्रीभिराययुः प्रणयेन युक्ताः १४ वेदांतानि च वेदाश्च मंत्रास्तंत्राः समूर्तयः दश सप्त पुराणानि षट्शास्त्राणि तदाययुः १५ गं
गाद्याः सरितस्तत्र पुष्करादिसरांसि च क्षेत्राणि च दिशः सर्वा दंडकादिवनानि च नगादयो ययुस्तत्र देवगंधर्वकिन्नराः गुरुत्वात्तत्र नायातान् भृगुः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५

मंत्रो ध्यवानयत् दीक्षिते नारदे नायस्त्रमासमनुत्तमं कुमारा वंदितास्ते निषेदुः कृष्णतत्पराः वैष्णवाश्च विरक्ताश्च न्यासिनो ब्रह्मचारिणः मुख्यभागे स्थि
ता स्तेषु तदग्रे नारदः स्थितः १९ एकभागे ऋषिगणास्तथान्यत्र दिवौकसः वेदोपनिषदोन्यत्र तीर्थान्यत्र स्त्रियोन्यतः २० जयशब्दो नमःशब्दः शंखशब्द
स्तथैव च चूर्णलाजाप्रसूनानां निक्षेपः सुमहानभूत् २१ विमानानि समारुह्य कियंतो देवनायकाः कल्पवृक्षप्रसूनैस्तं सर्वांस्तत्र समाकिरन् २२
एवं तेष्वेकचित्तेषु श्रीमद्भागवतस्य च माहात्म्यमूचिरे स्पष्टं नारदाय महात्मने २३ कुमारा ऊचुः अथ ते संप्रवक्ष्यामो महिमानं शुकशास्त्र
जं यस्य श्रवणमात्रेण मुक्तिः करतले स्थिता २४ सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् २५ ग्रंथो
ष्टादशसाहस्रो द्वादशस्कंधसम्मितः परीक्षिच्छुकसंवादः शृणु भागवतं च तत् २६ तावत्संसारचक्रेस्मिन् भ्रमतेज्ञानतः पुमान् यावत्कर्णगता नास्ति
शुकशास्त्रकथा क्षणं २७ किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति २८ कथा भागवतस्यापि नित्यं भवति
यद्गृहे तद्गृहं तीर्थरूपं हि वसतां पापनाशनं २९ अश्वमेधसहस्राणि वाजपेयशतानि च शुकशास्त्रकथायाश्च कलां नार्हंति षोडशीं ३० तावत्पा पा
पानि देहेस्मिन् निवसंति तपोधनाः यावन्न श्रूयते सम्यक् श्रीमद्भागवतं नरैः ३१ न गंगा न गया काशी पुष्करं न प्रयागकं शुकशास्त्रकथायाश्च फलेन
समतां नयेत् ३२ श्लोकार्द्धं श्लोकपादं वा नित्यं भागवतोद्भवं पठस्व स्वमुखेनैव यदीच्छसि परां गतिं ३३ वेदादिर्वेदमाता च पौरुषं सूक्तमेव च
त्रयी भागवतं चैव द्वादशाक्षरमेव च द्वादशात्मा प्रयागश्च कालः संवत्सरात्मकः ब्राह्मणाश्चाग्निहोत्रं च सुरभिर्द्वादशी तथा तुलसी च वसंतश्च
पुरुषोत्तम एव च एतेषां तत्वतः प्राज्ञैर्न पृथग्भाव इष्यते ३६ यश्च भागवतं शास्त्रं वाचयेदर्थतोनिशं जन्मकोटिकृतं पापं नश्यते नात्र सं
शयः ३७ श्लोकार्द्धं श्लोकपादं वा पठेद्भागवतं च यः नित्यं पुण्यमवाप्नोति राजसूयाश्वमेधयोः ३८ उक्तं भागवतं नित्यं कृतं च हरिचिंतनं तुल
सीपोषणं चैव धेनूनां सेवनं समं ३९ अंतकाले तु येनैव श्रूयते शुकशास्त्रवाक् प्रीत्या तस्यैव वैकुंठं गोविंदोपि प्रयच्छति ४० हेमसिंहयुतं
चैतद्वैष्णवाय ददाति यः कृष्णेन सह सायुज्यं स पुमान् लभते ध्रुवं ४१ आजन्ममात्रमपि येन शठेन किंचिच्चित्तं विधाय शुकशास्त्रक

५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

5A

च्यानपीता चांडालवत्स्वरवद्भूततेन नीतं मिथ्या स्वजन्म जननीजनिदुःखभागी ४२ जीवन्मुक्तो निगदितः स शठपापकर्मा येन श्रुतं शुककथा
वचनं न किंचित् धिङ्नरं पशुसमं भुवि भाररूपमेवं वदंति दिवि देवसमाजमुख्याः ४३ दुर्लभैव कलौ लोके श्रीमद्भागवतोद्भवा कोटिजन्म
समुत्थेन पुण्येनैव तु लभ्यते ४४ तेन योगनिधे धीमन् श्रोतव्या सा प्रयत्नतः दिनानां नियमो नास्ति सर्वदा श्रवणं मतं ४५ सत्येन ब्रह्मचर्येण
सर्वदा श्रवणं मतं अशक्यत्वात्कलौ बोध्यो विशेषोऽत्र शुकाज्ञया ४६ मनसश्चाजयाद्रोगात् पुंसां चैवायुषः क्षयात् कलेर्दोषबहुत्वाच्च
सप्ताहश्रवणं मतं ४७ मनोवृत्तिजयश्चैव नियमाचरणं तथा दीक्षां कर्तुं च शक्या स्यात् सप्ताहश्रवणं ततः ४८ श्रद्धातः श्रवणे नित्यं माघे ताव
द्धि यत्फलं तत्फलं शुकदेवेन सप्ताहश्रवणे कृतं ४९ यत्फलं नास्ति तपसा न योगेन समाधिना अनायासेन तत्सर्वं सप्ताहश्रवणे लभेत् ५० य
ज्ञाद्गर्जति सप्ताहः सप्ताहो गर्जति व्रतात् तपसो गर्जति प्रोच्चैस्तीर्थान्नित्यं हि गर्जति ५१ योगाद्गर्जति सप्ताहो ध्यानाज्ज्ञानाच्च गर्जति किं ब्रूमो गर्ज
नं तस्य रे रे गर्जति गर्जति ५२ शौनक उवाच साश्चर्यमेतत्कथितं कथानकं ज्ञानादिधर्मान् विगणय्य सांप्रतं निःश्रेयसे भागवतं पुराणं जातं कुतो योग
विदाद्वदस्व ५३ सूत उवाच यदा कृष्णो धरां त्यक्त्वा स्वपदं गंतुमुद्यतः एकादशं परिश्रुत्याप्युद्धवो वाक्यमब्रवीत् ५४ उद्धव उवाच त्वं तु यास्यसि गोविं
द भक्तकार्यं विधाय वै मच्चित्ते महती चिंता तां श्रुत्वा सुखमावह ५५ आगतोऽयं कलिर्घोरो भविष्यंति पुनः खलाः तत्संगेनैव संतोऽपि गमिष्यंत्युग्र
तां तदा ५६ तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत् अन्यो न दृश्यते त्राता त्वत्तः कमललोचन ५७ अतः सत्सु दयां कृत्वा भक्तवत्सल मा व्रज भक्तार्थं स
गुणो जातो निराकारोऽपि चिन्मयः त्वद्वियोगेन ते भक्ताः कथं स्थास्यंति भूतले निर्गुणोपासने कष्टमतः किंचिद्विचारय इत्युद्धववचः श्रुत्वा प्रभासेऽचिंत
यद्धरिः भक्तावलंबनार्थाय किं विधेयं मयेति च स्वकीयं यद्भवेत्तेजस्तच्च भागवतेऽदधात् तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवं ६१ तेनेयं वाङ्मयी मू
र्तिः प्रत्यक्षा वर्तते हरेः सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी ६२ सप्ताहश्रवणं तेन सर्वेभ्योऽप्यधिकं मतं साधनानि तिरस्कृत्य कलौ धर्मोऽयमीरितः दुः
खदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च कामक्रोधजयार्थं हि कलौ धर्मोऽयमीरितः अन्यथा वैष्णवी माया देवैरपि सुदुस्तरा कथं त्याज्या भवेत्पुंभिः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सूत उवाच।

सप्ताहोतः प्रकाशितः ६३ एवं ब्रुवाणे सति बादरायणौ(?) मध्ये सभायांमाश्चर्यमेकं समभूत्तदानीं तदुच्यते संप्रति शृणु शौनक त्वं
६४ भक्तिः सुतौ तौ तरुणौ गृहीत्वा प्रेमैकरूपा सहसाविरासीत् श्रीकृष्ण गोविंद हरे मुरारे नाथेति नामानि मुहुर्वदंती तां चागतां भागवतार्थभूषां सुचारुवेषां ददृशुः सदस्याः कथं प्रविष्टा कथमागतेयं मध्ये मुनीनामिति तर्कयंतः ६६ ऊचुः कुमारा वचनं तदानीं कथार्पितानिःपतिताधुनेयं एवं गिरः सा ससुता निशम्य सनत्कुमारं निजगाद नम्रा ६८ भक्तिरुवाच भवद्भिरद्यैव कृतास्मि पुष्टा कलिप्रनष्टापि कथारसेन क्वाहं त्विदानीं नु वसामि ब्रूत ब्राह्मास्तदिदं तामवोचन् ६९ भक्तेषु गोविंदसरूपकर्त्री प्रेमैकधर्त्री भवरोगहर्त्री सा त्वं च तिष्ठस्व सुधैर्यसंश्रया निरंतरं वैष्णवमानसानि ७० ततोपि दोषाः कलिजा इमे त्वां द्रष्टुं न शक्ताः प्रभवोपि लोके एवं तदाज्ञावसरेपि भक्तिस्तदा निषण्णा हरिदासचित्ते ७१ सकलभुवनमध्ये निर्धनास्तेपि धन्या निवसति हृदि येषां श्रीहरेर्भक्तिरेका हरिरपि निजलोकं सर्वथातो विहाय प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ७२ ब्रूमोद्य ते किमधिकं महिमानमेवं ब्रह्मात्मकस्य भुवि भागवताभिधस्य यत्संश्रयान्निगदिते लभते सुवक्ता श्रोतापि कृष्णसमतामलमन्यधर्मैः ७३ इति श्रीपद्मपुराणे उत्तरखंडे श्रीमद्भागवतपारायणमाहात्म्यनिरूपणे भक्तिकष्टनिवर्तनो नाम तृतीयोध्यायः ३ सूत उवाच ॥ अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीं निजलोकं परित्यज्य भगवान्भक्तवत्सलः १ वनमाली घनश्यामः पीतवासा मनोहरः कांचीकलापरुचिरो लसन्मुकुटकुंडलः २ त्रिभंगललितश्चारु कौस्तुभेन विराजितः कोटिमन्मथलावण्यो हरिचंदनचर्चितः ३ परमानंदचिन्मूर्तिर्मधुरो मुरलीधरः आविवेश स्वभक्तानां हृदयान्यमलानि च वैकुंठवासिनो ये च वैष्णवा उद्धवादयः तत्कथाश्रवणार्थं ते गूढरूपेण संस्थिताः ५ तदा जयजयारावो रसपुष्टिरलौकिकी चूर्णप्रसूनवृष्टिश्च मुहुः शंखरवोप्यभूत् ६ तत्सभायां स्थितानां च देहगेहात्मविस्मृतिं दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत् ७ नारद उवाच अलौकिकोयं महिमा मुनीश्वराः सप्ताहजन्योद्य विलोकितो मया मूढाः शठा ये पशुपक्षिणोत्र सर्वेपि निःपापतया विभांति ८ अतो नृलोके ननु नास्ति किंचिच्चित्तस्य शोधाय कलौ पवित्रं अघौघविध्वंसकरी कथैक कथासमानं भुवि नास्ति किं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

॥ कायेन वाचा मनसापि पातकं नित्यं प्रकुर्वंति शठा हठेन ये परस्य पुष्टा मलिना दुराशया सम्प्राप्य तेनैव कलौ पुनंति ते ॥ ८ ...
चित ९ येके विश्वसंति वदंतु मह्यं सम्प्राप्य तेनैव कथामयेन कृपालुभिर्लोकहितं विचार्य प्रकाशितः कोपि नवीनमार्गः १० कुमारा ऊचुः येमा
नवाः पापकृतोपि सर्वदा सदा दुराचाररता विमार्गगाः क्रोधान्विता दम्भकुटिलाः सकामिनः सम्प्राप्य तेनैव कलौ पुनंति ते ११ सत्येन हीनाः पितृमा
तृदूषकाः तृष्णाकुलाश्चाश्रमधर्मवर्जिताः ये दांभिका मत्सरिणो विहिंसकाः सम्प्राप्य तेनैव क... लौ पुनंति ते १२ पंचोग्रपापाः
छलछद्मकारिणः क्रूराः पिशाचाः स्वनिर्दयाः सप्ये ब्रह्मस्वपुष्टा व्यभिचारकारिणः सम्प्राप्य तेनैव कलौ पुनंति ते १४ अत्र ते कीर्तयिष्यामि इतिहासं
पुरातनं यस्य श्रवणमात्रेण पापहानिः परं भवेत १५ तुंगभद्रातटे पूर्वमभूत्पत्तनमुत्तमं यत्र वर्णाः स्वधर्मेण सत्यसत्कर्मतत्पराः १६ आत्मदेवः पुरे तस्मि
न् सर्ववेदविशारदः श्रौतस्मार्तेषु संस्नातो द्वितीय इव भास्करः १७ भिक्षुको वित्तवान् लोके नारी या धुंधुली स्मृता स्ववाक्यस्थापका नित्यं सुंदरी सुकु
लोद्भवा लोकवार्तारता क्रूरा प्रायशो बहुजल्पिका शूरा च गृहकृत्येषु कृपणा कलहप्रिया एवं निवसतो प्रेम्णा दंपत्यो रममाणयोः अर्थाः कामास्तयो
रासन्न सुखाय गृहादिकं पश्चाद्धर्माः समारब्धास्ताभ्यां संतानहेतवे गोभूहिरण्यवासांसि दीनेभ्यो यच्छतोः सदा धनार्द्धं धर्ममार्गेण ताभ्यां नीतं तथापि
वै न पुत्रो नापि वा पुत्री ततश्चिंतातुरो भृशं एकदा स द्विजो दुःखाद्गृहं त्यक्त्वा गतो वनं मध्याह्ने तृषितो जातस्तडागं समुपेयिवान् २३ पीत्वा जलं विषण्ण
स्तु प्रजादुःखेन कर्षितः मुहूर्तादपि तत्रैव संन्यासीकश्चिदागतः २४ दृष्ट्वा पीतजलं तं तु विप्रो यातस्तदंतिकं नत्वा पदयोस्तस्य ... निःश्वसन्संस्थितः
पुरः २५ यतिरुवाच कथं रोदिषि विप्र त्वं का ते चिंता बलीयसी वद त्वं सत्वरं मह्यं स्वस्य दुःखस्य कारणं २६ ब्राह्मण उ० किं ब्रवीमि ऋषे दुःखं पूर्वपापेन सं
चितं मदीयाः पूर्वजास्तोयं कवोष्णमुपभुंजते २७ मद्दत्तं नैव गृह्णंति प्रीत्या देवा द्विजातयः प्रजादुःखेन शून्योहं प्राणांस्त्यक्तुमिहागतः धिग्जीवितं प्र
जाहीनं धिग्गृहं च प्रजां विना धिग्धनं चानपत्यस्य धिक्कुलं संततिं विना २९ पाल्यते या मया धेनुः सा वंध्या सर्वथा भवेत् यो मया रोपितो वृक्षः सोपि वंध्यत्वमाश्र
येत् ३० यत्फलं मद्गृहायाते शीघ्रं तच्च विशुष्यति निर्भाग्यस्यानपत्यस्य किमतो जीवितेन मे ३१ इत्युक्त्वा स रुरोदोच्चैस्तत्पार्श्वे दुःखपीडितः तदा तस्य यतेश्चित्ते करु
णाभूद्गरीयसी ३२ तद्भालाक्षरमालां च वाचयामास योगवान् सर्वं ज्ञात्वा यतिः पश्चाद्द्विजमूचे सविस्तरं ३३ यतिरुवाच मुंच विप्र यातेयं प्रारब्धं स
विलोकितं सप्तजन्मावधि तव पुत्रो नैव च नैव च ३४ मंचाज्ञानं प्रजारूपं विलिष्टा कर्मणो गतिः विवेकं तु समाश्रित्य त्यज संसारवासनां ३५ संतते सगरो दुःखम।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वापोगपुरातथ्या रेमे वाद्यकुटुंवाशांतं त्यामेसर्वथामतं ३६ ब्राह्मणउ० विवेकेन भवेत्किंमे पुत्रं देहि बलादपि नो चेत्त्यजाम्यहं प्राणान् तदग्रे शोकमूर्छितः ३७
पुत्रादिसुखहीनो यं संन्यासः श्रुतवान् विरतः मानसः सरसो लोके पुत्रपौत्रसमान्वितः ३८ इति विप्रगृहे दृष्ट्वा प्रब्रवीत्स तपोधनः विप्रके नुर्गतः कथं विधिलेख
विमार्जेनोत्त ३९ नयास्यसि सुखं पुत्रान् तथापि देवहतोद्यमः अतो हठेन पुत्रोस्मि प्रार्थिते किं करोम्यहं ४० तस्याग्रहं समालोक्य फलमेकं न दत्तवान् इदं
भक्ष्य पत्न्यै त्वं ततः पुत्रो भविष्यति सत्यं शौचं दयादानमेकभक्तं तु भोजनं वर्षा वधि स्त्रिया कार्यं तेन पुत्रोति निर्मलः एवमुक्त्वा ययौ योगी विप्रस्तु ग
हमागतः पत्न्याः पाणौ फलं दत्त्वा स्वयं यातस्तु कुत्रचित् तरुणी कुटिला तस्य सरव्या प्रेचरतोदरं अहो किं नाम मो स्पन्त्रा फले वातं न भक्तये ४४ फलभक्ष्यणा
गर्भः स्यात् गर्भेणोदरवृद्धिता स्व स्य भक्तं ततो शक्तिः गृहकार्यं कथं भवेत् ४५ दैवाद्दृष्टि व्रजे ग्रामे पलायेत् हर्मिणीकथं सुकं वन्निवसे दुर्भे स्तं कुतेकथमत्स्ये
४६ त्रियकेदागतो गर्भस्तदा मे मरणं भवेत् प्रसूतौ दारुणो दुःखं सुकुमारी कथं सहेत् ४७ मंदायां मयि सर्वस्वं ननंदा संहरेत्तदा सत्यशौचादि नियमो दुराग
धः सहप्यते लालने पालने दुःखं प्रसूताया भविष्यते वंध्या वा विधवा नारी सुखिनी चेति मे मतिः ४९ एवं कुतर्कयोगेन तत्फलं नैव भक्षितं पत्याए छप
लं भुक्तं भुक्तं चेति तयेरितं एकदा भगिनी तस्या ग्रहं स्वेच्छया गता तदग्रे कथितं सर्वं चिंतयं मह तीति मे दुर्बलाते न दुःखेन खलु जे कर वाणि किं सा ब्रवीत्मम
गर्भोस्ति ते दास्यामि प्रसूतितः तावत्कालं स गर्भैव गुप्ताति ष्ठ गृहे सुखं वित्तं त्वं मत्पतये यच्छ सैनं दास्यति बालकं षाण्मासि कोमृतो बाल इति लोके वदिष्यति
ते वालं पोषयिष्यामि नित्यमागत्य ते गृहे फलं भक्तय धेनोस्त्वं परीक्षार्थं तु सांप्रतं तत्तदा रचितं सर्वं तथैव स्त्रीस्वभावतः अथ कालेन सा नारी प्रसूता वाल
कं तदा आनीय जनको वालं रहस्ये धुंधुली ददौ ५६ तया च कथितं भर्त्रे प्रसूतः सुकुमारकः लोकस्य सुखं मुत्पन्नमात्मदेव प्रजोदयात् ५७ ददौ दानं द्विजा
श्यो जातकर्म विधाय च गीतवादित्रघोषोभून्नद्द्वारे मंगलं वहु ५८ भर्त्रे ग्रे साब्रवीद्वाक्यं स्तन्यं नास्ति कुचे मम अन्यस्तन्येन दुर्दैर्ध्या कथं पुष्यामि बालकं ५९
मत्स्वसायाः प्रसूतायाः स्तनो वालस्तु वर्तते तामाकार्य गृहे रक्षो मा ते भर्त्स्या पयिष्यति ६० पतिना तत्कृतं सर्वं पुत्ररक्षणहेतवे पुत्रस्य धुंधुकारीति नाम मात्रा प्र
तिष्ठितं ६१ त्रिमासे निर्गते चाथ सा धेनुः सुषुवे र्भकं सर्वांगसुंदरं दिव्यं निर्मलं कनकप्रभं ६२ दृष्ट्वा प्रसन्नो विप्रस्तु संस्कारान्स्वयमादधे मत्वाश्चर्यं जनाः सर्वे दि
दृक्षार्थं समागताः भाग्योदयोधुना जातः आत्मदेवस्य पश्यत धेन्वा वालः प्रसूतस्तु देवरूपीति कौतुकं ६५ न ज्ञातं तद्रहस्यं तु केनापि विधियोगतः गोकर्णं वसतं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दृष्ट्वा गोकर्णनामाथाकरोत् कियत्कालेन तौ जातौ तरुणौ तनयावुभौ गोकर्णः पंडितो ज्ञानी धुंधुकारी महाखलः स्नानशौचक्रियाहीनो दुर्भक्षी क्रो
धसंयुतः दुःपरिग्रहकर्त्ता च शवहस्तेन भोजनं ६७ चौरः सर्वजनद्वेषी परवेश्मप्रदीपकः लालनायार्भकानेव नासद्घः कूपे निपातयेत् ६८ हिंसकः शस्त्र
धारी च दीनांधानां प्रपीडकः चांडालाभिरतो नित्यं पाशहस्तः श्वसंगतः ६९ तेन वेश्याकुसंगेन पैत्र्यं वित्तं तु नाशितं एकदा पितरौ ताड्य पात्राणि स्वयमाहरत्
७० तत्पिता कृपणः प्रोच्चैर्धनहीनो रुरोद ह वंध्यत्वं तु समीचीनं कुपुत्रो दुःखदायकः क्व तिष्ठामि क्व गच्छामि को मे दुःखं व्यपोहयेत् प्राणांस्त्यजामि दुःखेन
हा कष्टं मम संस्थितं तदानीं तु समागत्य गोकर्णो ज्ञानसंयुतः बोधयामास जनकं वैराग्यं परिदर्शयन् असारः खलु संसारो दुःखरूपी विमोहकः सुतः
कस्य धनं कस्य स्नेहवान् ज्वलतेऽनिशं न चेंद्रस्य सुखं किंचिन्न सुखं चक्रवर्त्तिनः सुखमस्ति विरक्तस्य मुनेरेकांतजीविनः मुंचाज्ञानं प्रजारूपं मोहतो नरके गतिः
निपतिष्यति देहोऽयं सर्वं त्यक्त्वा वनं व्रज ७६ तद्वाक्यं तु समाकर्ण्य गंतुकामः पिताब्रवीत् किं कर्त्तव्यं वने तात तत्त्वं वद सविस्तरं अंधकूपे स्नेहपाशे बद्धः पंगु
रहं शठः कर्मणा पतितो नूनं मामुद्धर दयानिधे गोकर्ण उवाच देहेऽस्थिमांसरुधिरेऽभिमतिं त्यज त्वं जायासुतादिषु सदा ममतां विमुंच पश्यानिशं जगदि
दं क्षणभंगनिष्ठं वैराग्यरागरसिको भव भक्तिनिष्ठः ७९ धर्मं भजस्व सततं त्यज लोकधर्मान् सेवस्व साधुपुरुषान् जहि काममधर्मान् अन्यस्य दोषगुण
कीर्त्तनमाशु मुक्त्वा सेवाकथारसमहो नितरां पिब त्वं ८० एवं सुतोक्तिवशतोऽपि गृहं विहाय यातो वनं स्थिरमतिर्गतषष्टिवर्षः युक्तो हरेरनुदिनं परिचर्य
यासौ श्रीकृष्णमाप नियतं दशमस्य पाठात् ८१ इति श्रीपद्मपुराणे उत्तरखंडे श्रीमद्भागवतपारायणमाहात्म्ये निरूपणे विप्रमोक्षो नाम चतुर्थोऽध्यायः ४
सूत उवाच पितर्युपरते तेन जननी ताडिता भृशं क्व वित्तं तिष्ठते ब्रूहि हनिष्ये लत्तया न चेत् १ इति तद्वाक्यसंत्रासाज्जनन्या पुत्रदुःखतः कूपपातः कृतो रात्रौ
तेन सा निधनं गता २ गोकर्णस्तीर्थयात्रायां निर्गतो योगसंस्थितः न दुःखं न सुखं तस्य न वैरी नापि बांधवः ३ धुंधुकारी गृहेऽतिष्ठत् पंचपण्यवधूवृतः अ
त्युग्रकर्मकर्त्ता च तत्पोषणविमूढधीः ४ एकदा कुलटास्तास्तु भूषणान्यभिलिप्सवः तदर्थं निर्गतो गेहात्कामांधो मृत्युमस्मरन् ५ यतस्ततश्च संहृत्य
वित्तं वेश्म पुनर्गतः ताभ्योऽयच्छत्सुवस्त्राणि भूषणानि कियंति च ६ बहुवित्तचयं दृष्ट्वा रात्रौ नार्यो विचारयन् चौर्यं करोत्यसौ नित्यमतो राजा ग्रहीष्यति ७
वित्तं हृत्वा पुनश्चैनं मारयिष्यति निश्चितं अतोऽर्थगुप्तये गूढमस्माभिः किं न हन्यते ८ निहत्यैनं गृहीत्वार्थं यास्यामो यत्र कुत्रचित् इति ता निश्चयं कृत्वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स प्रेमेव धरश्मिभिः ९ पाशं कंठे निधायास्य तन्मृत्युमुपचक्रमुः त्वरितं न ममारासौ चिंतायुक्तास्तदाभवन् तप्तांगारसमूहांश्च तन्मुखे हि विचिक्षि
पुः अग्निज्वालातिदुःखेन व्याकुलो निधनं गतः तं देहं मुमुचुर्गर्ते प्रायः साहसिकास्त्रियः न ज्ञातं तद्रहस्यं तु केनापीदं तदैव च १२ लोकैः पृष्टा वदंति
स्म दूरं यातः प्रियो हि नः आगमिष्यति वर्षेस्मिन् वित्तलोभविकर्षितः १३ स्त्रीणां नैव तु विश्वासं दुष्टानां कारयेद्बुधः विश्वासे यः स्थितो मूढः स दुः
खैः परिभूयते सुधामयं वचो यासां कामिनां रसवर्द्धनं हृदयं क्षुरधाराभं प्रियः को नाम योषितां संहृत्य वित्तं ता याताः कुलटा बहुभर्तृकाः धुंधुकारी
बभूवाथ महान्प्रेतः कुकर्मतः १६ वात्यारूपधरो नित्यं धावन् दशदिशोंतरं शीतातपपरिक्लिष्टो निराहारः पिपासितः १७ न लेभे शरणं कुत्र हा दैवे
ति मुहुर्वदन् कियत्कालेन गोकर्णो मृतं लोकादबुध्यत १८ अनाथं तं विदित्वैव गयाश्राद्धमचीकरत् यस्मिंस्तीर्थे तु संयाति तत्र श्राद्धं प्रवर्तयन् ए
वं भ्रमन् स गोकर्णः स्वपुरं समुपेयिवान् रात्रौ गृहांगणे स्वप्तुमागतो लक्षितः परैः २० तत्र सुप्तं स विज्ञाय धुंधुकारी स्वबांधवं निशीथे दर्शयामास महा
रौद्रतरं वपुः २१ सकृन्मेषः सकृद्धस्ती सकृच्च महिषोऽभवत् सकृदिंद्रः सकृच्चाग्निः पुनश्च पुरुषोऽभवत् २२ वैपरीत्यमिदं दृष्ट्वा गोकर्णो धैर्यसंयुतः अ
यं दुर्गतिकः कोपि निश्चित्याथ तमब्रवीत् २३ गोकर्ण उवाच कस्त्वमुग्रतरो रात्रौ कुतो यातो दशामिमां किं वा प्रेतः पिशाचो वा राक्षसोसीति शंस नः २४
सूत उवाच एवं पृष्टस्तदा तेन रुरोदोच्चैः पुनः पुनः अशक्तो वचनोच्चारे संज्ञामात्रं चकार ह २५ ततोंजलौ जलं कृत्वा गोकर्णस्तमुदीरयत् तत्सेकहतपा
पोसौ प्रवक्तुमुपचक्रमे प्रेत उ० अहं भ्राता त्वदीयोस्मि धुंधुकारीति नामतः स्वकीयेनैव दोषेण ब्रह्मत्वं नाशितं मया दुष्कर्मणो न संख्यास्ति महाज्ञाने विवर्ति
नः लोकानां हिंसकः सोहं स्त्रीभिर्दुःखेन मारितः अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहं वाताहारेण जीवामि दैवाधीनः फलोदयः अहो बंधो कृपासिंधो भ्रात
र्मामाशु मोचय गोकर्णो वचनं श्रुत्वा तस्मै वाक्यमथाब्रवीत् ३० गोकर्ण उ० त्वदर्थं च गयापिंडो मया दत्तो विधानतः तत्कथं नैव मुक्तोसि ममाश्चर्यमिदं
महत् गयाश्राद्धान्न मुक्तिश्चेदुपायो नापरस्त्विह किं विधेयं मया प्रेत तत्त्वं वद सविस्तरं ३१ प्रेत उ० गयाश्राद्धशतेनापि मुक्तिर्मे न भविष्यति उपायं पर
मं किंचिन्नद्विचारय सांप्रतं इति तद्वाक्यमाकर्ण्य गोकर्णो विस्मयं गतः शतश्राद्धैर्न मुक्तिश्चेदसाध्यं मोचनं तव इदानीं तु निजं स्थानमातिष्ठ प्रेत निर्भ
यः त्वन्मुक्तिसाधनं किंचिदाचरिष्ये विचार्य च धुंधुकारी निजं स्थानं तेनादिष्टस्ततो गतः गोकर्णश्चिंतयामास तां रात्रिं न तदध्यगात् ३६ प्रातस्तमागतं दृ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा० मा० ५

॥२५

सर्वेषां पश्यतां भेजे विमानं धुंधुलीसुतः विमाने वैष्णवान्वीक्ष्य गोकर्णो वाक्यमब्रवीत् ६८ गोकर्ण उ॰ अत्रैव बहवः संति श्रोतारो मम निर्मलाः आनीतानि
विमानानि न तेषां युगपत्कुतः ६९ श्रवणं समभागेन सर्वेषामिह दृश्यते फलभेदः कुतो जातः प्रब्रुवंतु हरेः प्रियाः ७० हरिदासा ऊचुः श्रवणस्य विभेदेन फल
भेदोपि संस्थितः श्रवणं तु कृतं सर्वैर्न तथा मननं कृतं फलभेदस्ततो जातः पुनः श्रावाद्भविष्यति सप्तरात्रमुपोष्यैव प्रेतेन श्रवणं कृतं ७२ मननादि तथा
तेन स्थिरचित्तकृतं भृशं अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतं संदिग्धो हि हतो मंत्रो व्यग्रचित्ते हतो जपः अवैष्णवो हतो देशो हतं श्राद्धमवैष्ण
वे हतमश्रोत्रिये दानं अनाचारं हतं कुलं विश्वासो गुरुवाक्येषु स्वस्मिन्दीनत्वभावना ७५ मनोदोषजयश्चैव कथायां निश्चला मतिः एवमादि कृतं चेत्स्या
त्तदा वै श्रवणे फलं ७६ पुनः श्रवांते सर्वेषां स्वधामे वसति ध्रुवं गोकर्ण तव गोविंदो गोलोकं दास्यति स्वयं एवमुक्त्वा ययुः सर्वे वैकुंठं हरिकीर्तनात् श्रावणे मा
सि गोकर्णः कथामूचे तथा पुनः सप्तरात्रवतीं भूयः श्रवणं तैः कृतं फलं कथासमाप्तौ यज्जातं श्रूयतां तच्च नारद विमानैः सह भक्तैश्च हरिराविर्बभूव ह जयश
ब्दा नमःशब्दास्तत्रासन् बहवस्तदा पांचजन्यध्वनिं चक्रे हर्षात्तत्र हरिः स्वयं गोकर्णं तु समालिंग्याकरोत्स्वसदृशं हरिः ८१ श्रोतॄनन्यान्घनश्यामान्पीतकौशेय
वाससः किरीटिनः कुंडलिनस्तथा चक्रे हरिः क्षणात् ८२ तद्ग्रामे ये स्थिता जीवा आश्वचांडालजातयः विमाने स्थापितास्तेपि गोकर्णकृपया तदा ८३ प्रेषिता
हरिलोके ते यत्र गच्छंति योगिनः गोकर्णेन स गोपालो गोलोके गोपवल्लभे ८४ कथाश्रवणतः प्रीतो निर्ययौ भक्तवत्सलः अयोध्यावासिनः पूर्वं
यथा रामेण संगताः ८५ तथा कृष्णेन ते नीता गोलोकं योगिदुर्लभं यत्र सूर्यस्य सोमस्य सिद्धानां न गतिः कदा तं लोकं प्रापितास्ते तु श्रीमद्भागवतश्रवात् ब्रूमो
ऽत्र ते किं फलमेतदुज्वलं सप्ताहयज्ञेन कथासमंचितं कर्णेन गोकर्णकथाक्षरो यैः पीतश्च ते गर्भगता न भूयः ८७ वातांबुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चि
रकालसंचितैः योगैश्च संयांति न तां गतिं सप्ताहगाथाश्रवणेन यांति यां ८८ इतिहासमिमं पुण्यं शांडिल्योपि मुनीश्वरः पठते चित्रकूटस्थो ब्रह्मानंदपरिप्लुतः
८९ आख्यानमेतत्परमं पवित्रं श्रुतं सकृत्सद्विदहेदघौघं श्राद्धे प्रयुक्तं पितृतृप्तिमावहेत् नित्यं सुपाठादपुनर्भवं च ९० इति श्रीपद्मपुराणे उत्तरखंडे श्रीम
द्भागवतपारायणमाहात्म्ये गोकर्णगुणवर्णनं नाम पंचमोऽध्यायः ५ कुमारा ऊचुः अथ ते संप्रवक्ष्यामः सप्ताहश्रवणे विधिं सहायैर्वसुभिश्चैव प्रायः
साध्यो विधिः स्मृतः १ दैवज्ञं तु समाहूय मुहूर्तं पृच्छ्य यत्नतः विवाहे यादृशं वित्तं तादृशं परिकल्पयेत् २ नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभः ए

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रामतोऽभ्यासमागताः तन्मध्ये कल्पितं तेन पञ्चातं यथा निशि ३७ विद्वांसो योगनिष्ठाश्च ज्ञानिनो ब्रह्मवादिनः तत्सत्रितैर्वपश्यंति पश्यंतः प्रा
तसंबधात् ततः सर्वैः सूर्याय कथं तन्मतो स्थापितं परं गोकर्णः स्तंभनं चक्रे सूर्यवेगस्य वै तदा तुभ्यं नमो जगत्साक्षिन् ब्रूहि मे मुक्तिहेतुकं तच्छ्रुत्वा दूरतः
सूर्यः स्फुटमित्यभिभाषत श्रीमद्भागवतान्मुक्तिः सप्ताहं वाचनं कुरु इति सूर्यवचः सर्वैर्धर्मरूपं तु विश्रुतं ४१ सर्वेऽब्रुवन् प्रयत्नेन कर्तव्यं सुकरं त्विदं
गोकर्णो निश्चयं कृत्वा वाचनार्थं प्रवर्तितः तत्र संश्रवणार्थाय देशग्रामाज्जना ययुः पंग्वंधवृद्धमंदाश्च तेपि पापक्षयाय वै ४३ समाजस्तु महाञ्जातो देव
विस्मयकारकः यदैवासनमास्थाय गोकर्णोऽकथयत्कथां स प्रेतोपि तदायातः स्थानं पश्यन्नितस्ततः सप्तग्रंथियुतं तत्रापश्यत्कीचकमुच्छ्रितं ४५ तन्मू
लछिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ वातरूपी स्थितिं कर्तुमशक्तो वंशमाविशत् वैष्णवं ब्राह्मणं मुख्यं श्रोतारं परिकल्प्य सः प्रथमस्कंधतः स्पष्टं आ
ख्यानं धेनुजोऽकरोत ४७ दिनांते रक्षिता गाथा तदा चित्रं बभूव ह वंशैकग्रंथिभेदोऽभूत् सशब्दः पश्यतां सतां द्वितीयेह्नि तथा सायं द्वितीयग्रंथिभेदनं तृतीयेह्नि
तथा सायं तृतीयं ग्रंथिभेदनं ४९ सर्वं सप्तदिनैर्वा सप्तग्रंथिविभेदनं कृत्वापि द्वादशस्कंधश्रवणात्प्रेततां जहौ दिव्यरूपधरो जातस्तुलसीदाममंडि
तः पीतवासा घनश्यामो मुकुटी कुंडलान्वितः ननाम भ्रातरं सद्यो गोकर्णमिति चाब्रवीत् त्वयाहं मोचितो बंधो कृपया प्रेतकश्मलात ५२ धन्या भागवती
वार्ता प्रेतपीडाविनाशिनी सप्ताहोपि तथा धन्यः कृष्णलोकफलप्रदः कंपंते सर्वपापानि सप्ताहश्रवणे स्थिते अस्माकं प्रलयं सद्यः कथेयं च करिष्यति आ
र्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्मभिः कृतं श्रवणं विदहेत्पापं पावकः समिधो यथा अस्मिन्वै भारते वर्षे सूरिभिर्देवसंसदि अकथाश्राविणां पुंसां निष्फ
लं जन्म कीर्तितं ५६ किं मोहतो रक्षितेन सुपुष्टेन बलीयसा अध्रुवेण शरीरेण शुकशास्त्रकथां विना अस्थिस्तंभं स्नायुबद्धं मांसशोणितलेपितं चर्माव
नद्धं दुर्गंधपात्रं मूत्रपुरीषयोः जराशोकविपाकार्तं रोगमंदिरमातुरं दुष्पूरं दुर्धरं दुष्टं सदोषं क्षणभंगुरं ५९ कृमिविड्भस्मसंज्ञांतं शरीरमिति वर्णितं अस्थि
रेण स्थिरं कर्म कुतोऽयं साधयेन्नहि ६० यत्प्रातः संस्कृतं चान्नं सायं तच्च विनश्यति तदीयरससंपुष्टे काये का नाम नित्यता ६१ सप्ताहश्रवणाल्लोके प्राप्यते
निकटे हरिः अतो दोषनिवृत्त्यर्थमेतदेव हि साधनं ६२ बुद्बुदा इव तोयेषु मशका इव जंतुषु जायंते मरणायैव कथाश्रवणवर्जिताः ६३ जडस्य शुष्कवंशस्य
यत्र ग्रंथिविभेदनं चित्रं किमु तदा चित्तग्रंथिभेदः कथाश्रवात् भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते सर्वकर्माणि सप्ताहश्रवणे कृते ६५ संसारक
र्दमालेपप्रक्षालनपटीयसि कथातीर्थे स्थिते चित्ते मुक्तिरेव बुधैः स्मृता एवं वदति वै तस्मिन् विमानमपतत्तदा स्वधामवासिभिर्युक्तं प्रस्फुरद्दीप्तिमंडलं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेनमासं कथारंभे श्रोतृणां मोतसूचकाः ३ मासानां विद्यते यानि तानि त्याज्यानि सर्वथा सहायाश्चत एवात्र कर्तव्याः सोद्यमाश्च ये देशे देशे तथा
ह्येषा वार्ता प्रेष्या प्रयत्नतः भविष्यति कथा चात्र आगंतव्यं कुटुंबिभिः दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्तनाः स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत् ६
देशे देशे विरक्ता ये वैष्णवाः कीर्तनोत्सुकाः तेष्वेव पत्रं प्रेष्यं च तल्लेखनमितीरितं ७ सतां समाजो भविता सप्तरात्रं सुदुर्लभः अपूर्वरसरूपैव कथा चात्र भवि
ष्यति ८ श्रीभागवतपीयूषपानाय रसलंपटाः भवंतः श्च तदा शीघ्रमायांतु प्रेमतत्पराः नावकाशः कदाचिद्दिनमात्रं तथापि वा सर्वथागमनं कार्यं
क्षणोऽत्रैव सुदुर्लभः १० एवमाकारणं तेषां कर्तव्यं विनयेन च आगंतुकानां सर्वेषां वासस्थानानि कल्पयेत् ११ तीर्थे वापि वने वापि गृहे वा श्रवणं मतं विशा
ला वसुधा यत्र कर्तव्यं तत्कथास्थलं १२ शोधनं मार्जनं भूमेर्लेपनं धातुमंडलं गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत् अर्वाक् पंचाहतो यत्नादास्तीर्णानि प्रमे
लयेत् कर्तव्यो मंडपः प्रोच्चैः कदलीखंडमंडितः ऊर्द्ध्वं सप्तैव लोकाश्च कल्पनीयाः सविस्तरं तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबोध्य च १५ पूर्वं तेषामासनानि क
र्तव्यानि यथोत्तरं वक्तुश्चापि तथा दिव्यमासनं परिकल्पयेत् १६ उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तथा प्राङ्मुखश्च भवेद्वक्ता श्रोता चोदङ्मुखस्तथा अ
थवा पूर्वदिग्ज्ञेया पूज्यपूजकमध्यतः श्रोतॄणामागमे प्रोक्ता देशकालादिकोविदैः १८ विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत् दृष्टांतकुशलो धीरो व
क्ता कार्योऽतिनिस्पृहः १९ अनेकधर्मविभ्रांताः स्त्रैणाः पाखंडवादिनः शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पंडिताः २० वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्त
थाविधः पंडितः संशयच्छेत्ता लोकबोधनतत्परः वक्त्रा क्षौरं प्रकर्तव्यं दिनादर्वाक् व्रताप्तये अरुणोदये असौ निर्वर्त्य शौचं स्नानं समाचरेत् नित्यं संक्षेपतः कृत्वा
संध्याद्यं प्रयत्नतः कथाविघ्नविघातार्थं गणनाथं प्रपूजयेत् पितॄन्संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं समाचरेत् मंडलं च प्रकर्तव्यं तत्र स्थाप्यो हरिस्तदा कृष्णमुद्दि
श्य मंत्रेण चरेत्पूजाविधिं क्रमात् प्रदक्षिणनमस्कारान् पूजांते स्तुतिमाचरेत् २५ संसारसागरे मग्नं दीनं मां करुणानिधे प्रदक्षिणनमस्कारान् पूजांते स्तुतिमा
चरेत् २६ श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः कर्तव्या विधिना प्रीत्या धूपदीपसमन्विता ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत् स्तुतिः प्रसन्न
चित्तेन कर्तव्या केवलं तदा २८ पत्रं पुष्पं फलं तोयं भक्त्या देव जनार्दन प्रसन्नोऽसि मया देव शंखचक्रगदाधर २९ श्रीमद्भागवताख्यं त्वं प्रत्यक्षः कृष्ण एव हि
स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ३० मनोरथो मदीयोऽयं सफलं सर्वथा त्वया निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव एवं दीनवचः प्रोच्य वक्तारं चाथ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा॰ मा॰ ९

पूजयेत् तं मस्थं वस्त्रभूषणाभिः पूजांते तं च संस्तवेत् शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद एतत्कथाप्रकाशेन मदज्ञानं विनाशय ३३ तदग्रे नियमः पश्चा
त्कर्तव्यः श्रेयसे तदा सप्तरात्रं यथाशक्त्या धारणीयः स एव हि ३४ वरणं पंचविप्राणां कथाभंगनिवृत्तये कर्तव्यं तैर्हरिर्जाप्यो द्वादशाक्षरविद्यया ३५ ब्रा
ह्मणान्वैष्णवान् वान्यान् तथा कीर्तनकारिणः नत्वा संपूज्य दत्ताज्ञः स्वयमासनमाविशेत् लोकवित्तधनागारपुत्रचिंतां व्युदस्य च कथाचित्तः शुद्धमतिः
स लभेत्फलमुत्तमं आसूर्योदयमारभ्य सार्द्धत्रिप्रहरांतकं वाचनीया कथा सम्यक् धीरकंठं सुधीमता ३८ कथाविरामः कर्तव्यो मध्याह्ने घटिकाद्वयं तत्क
थामनु कार्यं वै कीर्तनं वैष्णवैस्तथा मलमूत्रजयार्थं वै लघ्वाहा[illegible]रः सुखावहः हविष्यान्नेन कर्तव्यो ह्येकवारं कथार्थिना ४० उपोष्य सप्तरात्रं वै शक्ति
श्चेच्छृणुयात्सुखे फलाहारेण वा श्राव्यमेकभुक्तेन वा पुनः ४१ सुखसाध्यं भवेद्यत्तु कर्तव्यं श्रवणाय तत् भोजनं तु वरं मन्ये कथाश्रवणकारकं नोपवासे
वरं प्रोक्तं कथाविघ्नकरो यदि सप्ताहव्रतिनां पुंसां नियमान् शृणु नारद विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ४४ ब्रह्मचर्यमधः सुप्तिः पत्रावल्यां च
भोजनं कथासमाप्तौ भुक्तिं च कुर्यान्नित्यं कथाव्रती ४५ द्विदलं मधु तैलं च गरिष्ठान्नं तथैव च भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती पलांडुं लसुनं हिंगुं मू
लकं गृंजनं तथा नालिका मसूरकूष्मांडं नैवाद्याच्च कथाव्रती वेदांके च कलिंगं च रध्वमन्नं मसूरिकां निष्पावान्नामिषाद्यं च वर्जयेत्तु कथाव्रती कामं क्रो
धं मदं मानं मत्सरं लोभमेव च दंभं मोहं तथा द्वेषं दूरयेच्च कथाव्रती वेदवैष्णवविप्राणां गुरुगोव्रतिनां तथा स्त्रीराजमहतां निंदां वर्जयेद्यः कथाव्रती रज
स्वलांत्यजम्लेच्छपतितव्रात्यकैस्तथा द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती ५० सत्यं शौचं दयां मौनं मार्जवं विनयं तथा उदारं मानसं तद्वत्कुर्यादेवं क
थाव्रती दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मवान् अनपत्यो मोक्षकामः शृणुयात्तु कथामिमां ५[illegible] पुष्पा काकवंध्या च वंध्या या च मृतार्भका
स्र[illegible]वद्गर्भा च या नारी तया श्राव्या प्रयत्नतः ५२ एतेषु विधिनाख्यातं नरस्तयतरं भवेत् अत्युत्तमादिना सप्तकोटियज्ञफलप्रदा ५४ एवं कृत्वा व्रतविधिमुद्या
पनं समाचरेत् तज्जन्माष्टमीव्रतवत्कर्तव्यं फलकांक्षिभिः अकिंचनेषु भक्तेषु प्रायो नोद्यापनाग्रहः श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः एवं नगाहय
ज्ञेस्मिन्समाप्ते श्रोतृभिस्तदा पुस्तकस्य च वक्तुश्च पूजा कार्यातिभक्तितः ५७ प्रसादतुलसीमाला श्रोतृभ्यश्चार्थदीयतां मृदंगतालललसितकीर्त्तिनं कीर्त्ति
नं तथा ५८ जयशब्दं नमःशब्दं शंखशब्दश्च गीयतां विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं प्रदीयतां ५९ विरक्तश्चेद्भवेच्छ्रोता गीता वाच्या परेऽहनि गृहस्थ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा॰ सर्गे स लेभे कैलासे [illegible] ठे नास्त्य येरसः अतः पिबेत् सद्भावयामामंवेत कर्हिचित् [illegible] सूत उवाच इति ब्रुवाणो मुनिवारणायणो मध्ये सभां श्रीह
मा॰ रिराविरासीत् प्रह[illegible] स्यु कृष्णवल्लभ नादि निर्गतः सुरर्षिः सम [illegible] जयपद्मतान् ८५ दृष्ट्वा प्रसन्नं महदासने विभुं तेव चिरे कीर्तनमग्रतस्तदा भवो भवान्या क
११ मलासनः [illegible] मन्त्री कीर्तनदर्शनाय ८६ प्रह्लादस्तालधारी तरलगतितया चोद्धवः कांस्यधारी वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्ताऽर्जुनोऽभूत् इं
द्रोवादी मृदंगं जय[illegible] स्सकराः कीर्तने ते कुमाराः यत्राग्रे भाववक्ता रसविरचनया व्यासपुत्रो बभूव ८७ ननर्त मध्ये त्रिकमेव तत्र भक्त्यादिकानां नटवत्सुतेजसां अ
लौकिकं कीर्तन[illegible] द्वीक्ष्य हरिः प्रसन्नोऽपि वचोऽब्रवीत्ततः ८८ मत्तो वरं भागवता वृणुध्वं प्रीतः कथाकीर्तनतोऽस्मि साम्प्रतं श्रुत्वेति तद्वाक्यमति प्रसन्नाः प्रेमार्द्रचि
त्ता हरिमूचुरेते ८९ नगाह गाथासु च सर्वभक्तैः रभित्वया भाव्यमति प्रयत्नात् मनोरथोयां परिपूरयित्वा तथेति चोक्त्वान्तरधीयताच्युतः ९० ततोऽनमत्तच्चरणे
षु नारदस्तथा [illegible] शुकादीनपि तापसांस्तथा अथ प्रहृष्टाः परिनष्टमोहाः सर्वे ययुः पीतकथारसास्ते ९१ भक्तिः सुताभ्यां सह रक्षिता सा शास्त्रे स्वकीयेपि तदा
शुकेन [illegible] हरिर्भागवतस्य सेवनाच्चित्तं समायाति हि वैष्णवानां ९२ दारिद्र्यदुःखज्वरदाहकानां मायापिशाचीपरिमर्दितानां संसारसिंधौ परिपातितानां
क्षेमाय वै भागवतं प्रगर्जति ९३ अर्चनं वंदनं दास्यं स्मरणं पादसेवनं गायनं नर्तनं चैव सख्यमात्मनिवेदनं ९४ शौनक उवाच शुकेनोक्तं कदा राज्ञे गो
कर्णेन [illegible] वा पुनः सुरर्षये कदा ब्रूहि छिंधि मे संशयं त्विदं ९५ सूत उवाच आकृष्णनिर्गमात्त्रिंश द्वर्षाधिक्ये कलौ गते नवमीतो नभस्ये च कथारंभं
शुकोऽकरोत् ९६ परीक्षिच्छ्रवणान्ते च कलौ वर्षशतद्वये शुद्धे शुचौ नवम्यां च धेनुजोऽकथयत्पुरा ९७ तस्मादपि कलौ याते त्रिंशतसमब्दके
ऊर्जे शुक्ले नवम्यां च ब्रह्मणाः सुताः ९८ इत्येतत्ते समाख्यातं यत्पृष्टोऽहं त्वयानघ कलौ भागवती वार्ता भवरोगविनाशिनी ९९ कृष्णप्रियं सकल
कल्मषनाशनं च भक्त्यैकहेतुमिह भक्तिविलासकारि सन्तः कथानकमिदं पठतादरेण लोके हि तीर्थपरिशीलनसेवया किम् १०० इति श्रीपद्म
पुराणे उत्तरखंडे श्रीमद्भागवतपारायण माहात्म्ये निरूपणे उद्यापनविधिवर्णनं नाम षष्ठोऽध्यायः ६ समाप्तश्चायं श्रीमद्भा
गवतपारायणमाहात्म्यम् शुभमस्तु [illegible] श्रीहरिः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मेनस्य होमः कर्तव्य कर्मशांतये ६० प्रतिश्लोकं च जुहुयात् विधिना दशमस्य च पायसं मधुसर्पिभ्यां तिलाद्यादिकसंयुतं ६१ अ[...]थवा तवनं कुर्याद्गायत्र्यास्तु
समाहितः तन्मयत्वात्पुराणस्य परमस्यास्य तत्वतः होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये विप्रस्य च विरोधार्थं न्यूनताधिकतारव्ययोः दोषयोः प्रशमा
र्थं च पठेन्नामसहस्रकं तेन स्यात्सफलं सर्वं नास्त्यस्मादधिकं यतः ६४ द्वादशब्रा[...]ह्मणान्पश्चाद्भोजयेन्मधुपायसैः दद्यात्सुवर्णं धेनुं च व्रतपूर्णत्वसिद्ध
ये शक्तौ फलत्रयं सिंहं स्वर्णसिंहं विधाय च तत्रास्य पुस्तकं स्थाप्य लिखितं ललिताक्षरं ६६ संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणं वस्त्रभूषणगंधाद्यैः
पूजिताय यतात्मने देयमाचार्याय सुधीर्दत्वा मुक्तः स्याद्भवबंधनैः एवं कृते विधाने च सर्वपापनिवारणे फलदं स्यात्पुराणं तु श्रीमद्भागवतं शुभं धर्मा
र्थकाममोक्षाणां साधनं नात्र संशयः ६ इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि श्रीमद्भागवतेनैव भुक्तिर्मुक्तिः प्रकाशितो ७० सूत उवाच इत्युक्त्वा ते म
हात्मानः प्रोचुर्भागवतीं कथां सर्वपापहरां पुण्यां भक्तिमुक्तिप्रदायिनीं ७१ श्रृण्वतां सर्वभूतानां सप्ताहं नियतात्मनां यथाविधि ततो देवं तुष्टुवुः पुरुषो
त्तमं तदंते ज्ञानवैराग्यभक्तानां पुष्टता परा तारुण्यं परमं चाभूत्सर्वलोकमनोहरं नारदश्च कृतार्थोभूत्सिद्धे स्वीयमनोरथे पुलकांकितसर्वांगः परमानं
दसंभृतः ७३ एवं कथां समाकर्ण्य नारदो भगवत्प्रियः प्रेमगद्गदया वाचा तानुवाच कृतांजलिः ७४ श्रीनारद उवाच धन्योस्म्यनुगृहीतोस्मि भवद्भिः करु
णापरैः अद्य [...]भागवतां लब्धः सर्वपापहरो हरिः ७५ श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः स्वधाम याति यतः कृष्ण श्रवणाद्यस्य लभ्यते ७६ सूत उवाच
एवं ब्रुवति वै तात[...]स्मिन्नारदे वैष्णवोत्तमे परिभ्रमन्समायातः शुको योगेश्वरस्तदा ७७ तत्राययौ षोडशवार्षिकः व्यासात्मजो ज्ञानमहाब्धिचंद्रमाः
कथावसाने निजलाभपूर्णः प्रेम्णा पठन्भागवतं शनैः शनैः ७९ दृष्ट्वा सदस्याः परमोरुतेजसं सद्यः समुत्थाय ददौ वरासनं प्रीत्या सुरर्षिस्तमपूजयत्
सुखं स्थितो वद[...]र्णनाममलं वचः ८० शुक उवाच निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं पिबत भागवतं रसमालयं मुहुरहो
रसिका भुवि भावुकाः ८१ धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं श्रीमद्भागवते महामुनिकृ
ते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ८२ श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं यस्मिन्पा[...]रमहंस
मेकममलं ज्ञानं परं गीयते यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्सुपठन्विचारणपरो भक्त्या विमुच्येन्नरः ८३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative